# Shri Jagannatha-Prarthana

# શ્રીજગન્નાથ-પ્રાર્થના

## Document Information

Text title : Jagannatha Prarthana

File name : jagannAthaprArthanA.itx

Category : vishhnu, krishna, hkmeher

Location : doc_vishhnu

Author : Harekrishna Meher meher.hk at gmail.com

Transliterated by : Harekrishna Meher

Proofread by : Harekrishna Meher

Description/comments : Stavarchana-Stavakam (Sanskrit Stotra-Kavya)

Acknowledge-Permission: Dr. Harekrishna Meher

Latest update : November 11, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 10, 2023

*sanskritdocuments.org*

Shri Jagannatha-Prarthana

# શ્રીજગન્નાથ-પ્રાર્થના

શુભં સુભદ્રા-બલભદ્ર-સઙ્ગતં
નમામિ નાથં જગતાં વરેણ્યમ્ ।
ઓઙ્કાર-રૂપં ભુવિ દારુ-દૈવતં
વેદાન્ત-વેદ્યં મહતાં શરણ્યમ્ ॥ ૧॥

નતોઽસ્મિ વિષ્ણું હૃદિ રાજમાનં
નીલાદ્રિ-વાસં કરુણા-નિધાનમ્ ।
વૃન્દારકૈ-ર્વન્દિત-પાદ-પુષ્કરં
બ્રહ્મ-સ્વરૂપં પુરુષોત્તમં પરમ્ ॥ ૨॥

અપાણિ-પાદં મનસાં પ્રસાદં
કૃષ્ણં ગુણાતીતમજં સુરેશમ્ ।
તપોધનૈરર્ચિત-પુણ્યપાદં
વન્દે વિભું તં ધૃત-વિશ્વવેશમ્ ॥ ૩॥

લીલા વિચિત્રા તવ માનવાયિતા
શારીરિકી ભઙ્ગુરતા પ્રદર્શિતા ।
વાર્ત્તાસ્તિ મર્ત્ત્યે પરિવર્ત્તતે તનુઃ
સત્યં હિ મૃત્યુ-ર્નિયતં પુનર્જનુઃ ॥ ૪॥

પુરાતનં દારુમયં કલેવરં
ત્યક્ત્વા પ્રભો હે ! સમયે સમાગતે ।
દધાસિ દેહં નવદારુ-સુન્દરં
સાંસારિકી રીતિરિયં જગત્પતે ! ॥ ૫॥

લક્ષ્મીપતિં શઙ્ખ-ગદાબ્જ-ચક્રિણં
શ્રીવાસુદેવં દુરિતાપહારિણમ્ ।
રથોત્સવે દર્શિત-ચારુ-વિગ્રહં
ભક્ત્યા તમીશં શિરસા નમામ્યહમ્ ॥ ૬॥

પ્રદેહિ ચિત્તે વિમલાવકાશં
ગતાન્ધકારં  વિતર પ્રકાશમ્ ।
કુરુષ્વ મે કલ્મષરાશિ-નાશં
હર પ્રભો ! સંસૃતિ-બન્ધ-પાશમ્ ॥ ૭॥

મૈત્રીં પ્રશાન્તિં સુખદાં ચિરન્તનં
તનોતુ વિશ્વે તવ નામ-ચિન્તનમ્ ।
આત્મીયતા-રૂપ-રસો મહીયતાં
પ્રભો જગન્નાથ !  કૃપા વિધીયતામ્ ॥ ૮॥

– રચયિતા : ડૉ હરેકૃષ્ણ-મેહેરઃ

Proofread by

Copyright Dr.Harekrishna Meher

*Shri Jagannatha-Prarthana*
pdf was typeset on November 10, 2023

Please send corrections to *sanskrit@cheerful.com*